.. shrii dhana laxmii puujA..

# ॥ श्री धन लक्ष्मी पूजा ॥

Check List

1. Altar, Deity (statue/photo),
2. Two big brass lamps (with wicks, oil/ghee)
3. Matchbox, Agarbatti
4. Karpoor, Gandha Powder, Kumkum, gopichandan, haldi
5. Sri Mudra (for Sandhyaavandan), Vessel for Tirtha, Yajnopaviita
6. Puujaa Conch, Bell, One aaratii (for Karpoor), Two Aaratiis with wicks
7. Flowers, Akshata (in a container), tulsi leaves
8. Decorated Copper or Silver Kalasha, Two pieces of cloth (new),
9. Coconut, 1/2 kg. Rice, Bananas 6, gold coin, gold chain
10. Extra Kalasha, 3 trays, 3 vessels for Abhisheka
11. Beetlenuts 6, Beetlenut Leaves 12, Banana Leaves 2, Mango Leaves 5-25
12. Dry Fruits, 5 bananas, 1 coconut - all for naivedya
13. Panchaamrita - Milk, Curd, Honey, Ghee, Sugar, Tender Coconut Water
14. Puja Book, Sri Lakshmii ashTottara Book
15. Dora (thread)

Previous Night, think of the Goddess and mentally decide to perform puujaa the next day.
This is the sankalpa. Next day early morning keep the same thoughts of worshipping the
Goddess and take a head-bath (if possible an oil-bath). Have some soothing Indian Music
(Shehnai or sa.ntuur or sitaar or naadasvaram - preferably any instrumental) going
on in the background till the puujaa begins. The music should be pleasing (not too loud)
for creating a serene mood. (Of course people should be internally peaceful also!)

Wash Kalasha and fill it with clean water upto 3/4 of it. Cover and
place it near the altar. Observe Fast (if possible). Decorate the front door, altar and the place near the altar. Invite your relatives, friends (who have bhakti
in the Goddess). Keep all the things for puujaa ready, near the altar.

Duration - start to aaratii - 2 hours

1. At the regular Altar

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥
अनुज्ञां देहि ॥

२ आचमनः
(At Shrii Lakshmi Altar)
(Sip one spoon of water after each mantra)

ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा ।
ॐ माधवाय स्वाहा ।

(Now we chant the 21 names of the Lord, in order to concentrate on the Lord)

ॐ गोविंदाय नमः । ॐ विष्णवे नमः ।
ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः ।
ॐ वामनाय नमः । ॐ श्रीधराय नमः ।
ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः ।
ॐ दामोदराय नमः । ॐ सङ्कर्षणाय नमः ।
ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः ।
ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः ।
ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः ।
ॐ अच्युताय नमः । ॐ जनार्दनाय नमः ।
ॐ उपेंद्राय नमः । ॐ हरये नमः ।
श्री कृष्णाय नमः ॥

---

३ प्राणायामः

ॐ प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता ।
दैवी गायत्री छन्दः । प्राणायामे विनियोगः ॥

ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः ।
ॐ जनः । ॐ तपः । ॐ सत्यम् ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही
धियो योनः प्रचोदयात् ॥

पुनराचमन
(Repeat Achamana 2 - given above)
ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥
(Apply water to eyes and understand that you are of the nature of Brahman)

---

४ सङ्कल्पः

ॐ श्रीमान् महागणाधिपतये नमः ।

श्री गुरुभ्यो नमः । श्री सरस्वत्यै नमः ।
श्री वेदाय नमः । श्री वेदपुरुषाय नमः ।
इष्टदेवताभ्यो नमः ।
(Prostrations to your favorite deity)
कुलदेवताभ्यो नमः ।
(Prostrations to your family deity)
स्थान देवताभ्यो नमः ।
(Prostrations to the deity of this house)
ग्रामदेवताभ्यो नमः ।
(Prostrations to the deity of this place)
वास्तुदेवताभ्यो नमः ।
(Prostrations to the deity of all the materials we have collected)
शचीपुरंदराभ्यां नमः ।
(Prostrations to Indra and shachii)
उमामहेश्वराभ्यां नमः ।
(Prostrations to Shiva and pArvati)
मातापितृभ्यां नमः ।
(Prostrations to our parents)
लक्ष्मीनारायणाभ्यां नमः ।
(Prostrations to the Lords who protect us - LakShmi and NArAyaNa)
सर्वेभ्यो देवेभ्यो नमो नमः ।
(Prostrations to all the Gods)
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।
(Prostrations to all Brahamanas - those who are in the religious path)
येतद्कर्मप्रधान देवताभ्यो नमो नमः ।
(Prostrations to Goddess dhana laxmi, the main deity if this puja)

॥ अविघ्नमस्तु ॥

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटेश्चैव विघ्नः तस्य न जायते ॥

(Whoever chants or hears these 12 names of Lord

Ganesha will not have any obstacles in all their endeavours)

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ॥

(We completely surrender ourselves to that Goddess who embodies auspiciousness, who is full of auspicious-ness and who brings auspicousness to us)

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ॥

(When Lord Hari, who brings auspiciousness is situated in our hearts, then there will be no more inauspiciousness in any of our undertakings)

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ।
विद्या बलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि ॥

(What is the best time to worship the Lord? When our hearts are at the feet of Lord Narayana, then the strength of the stars, the moon, the strength of knowledge and all the Gods will combine and make it the most auspicious time and day to worship the Lord)

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दीवर श्यामो हृदयस्थो जनार्दनः ॥

(When the Lord is situated in a person's heart, he will always have profit in his work and victory in all that he takes up and there is no question of defeat for such a person)

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

(To achieve success in our work and to find fulfillment we should first offer our prayers to Lord Vinayaka and then to our teacher, then to the Sun God and to the holy trinity of Brahma, ViShNu and Shiva)

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य
अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे
वैवस्वत मन्वन्तरे भारत वर्षे भरत खंडे जंबूद्वीपे
दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे
तीरे परशुराम क्षेत्रे (सम्युक्त अमेरिका देशे St Lewis ग्रामे
or Australia देशे Victoria ग्रामे बह्नीनु देशे)
शालिवाहन शके वर्तमाने व्यवहारिके बहु धान्य नाम संवत्सरे
दक्षिण आयणे,शरद् ऋतौ,आश्वीयज मासे,शुक्ल पक्षे,
अमावास्याम् तिथौ,हस्त नक्षत्रे,सोम वासरे, सर्व ग्रहेषु यथा राशि
स्थान स्थितेषु सत्सु येवं गुणविशेषेण विशिष्टायां
शुभपुण्यतिथौ मम आत्मन श्रुतिस्मृतिपुराणोक्त फलप्राप्यर्थं
मम सकुटुम्बस्य क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ
सिध्यर्थं अंगीकृत श्री धन लक्ष्मी व्रतांगत्वेन संपादित सामग्रय्य
श्री धन लक्ष्मि प्रीत्यर्थं यथा शक्त्या यथा मिलिता उपचार द्रव्यैः
श्री सूक्त पुराणोक्त मन्त्रैश्च ध्यान आवाहनादि षोडशोपचारे
श्री धन महालक्ष्मि पूजनं करिष्ये ॥

इदं फलं मयादेवी स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ॥
(keep fruits in front of the Goddess)

---

५ । षडङ्ग न्यास
(Purifying the body)

---

५ ।(१) कर न्यास
(Purifying the hands)

ॐ ह्रां । अंगुष्ठाभ्यायां नमः । हृदयाय नमः ॥
(touch the thumbs)
ॐ ह्रीं । तर्जनीभ्यां नमः । शिरसे स्वाहा ॥
(touch both fore fingers)
ॐ ह्रुं । मध्यमाभ्यां नमः । शिखायै वौषट् ॥
(touch middle fingers)
ॐ ह्रैं । अनामिकाभ्यां नमः । कवचाय हुम् ॥
(touch ring fingers)
ॐ ह्रौं । कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् ॥
(touch little fingers)
ॐ ह्रः । करतलकरपृष्ठाभ्यां नमः । अस्त्राय फट् ॥
(touch palms and over sleeve of hands)

---

६ दिग्बन्धन
( show mudras)

ॐ भूर्भुवस्वरोम् इति दिग्बन्धः ।
(snap fingers, circle head clockwise and clap hands)
दिशो बद्नामि ॥

(shut off all directions i.e. distractions so that we can concentrate on the Goddess)

---

७ गणपति पूजा

आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये ।
ॐ गणानां त्वा शौनको घृत्समदो गणपतिर्जगति
गणपत्यावाहने विनियोगः ॥
(pour water)

ॐ गणानां त्वा गणपतिं आवामहे ।
कविं कविनामुपम श्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत ।
आनः शृण्वन्नूतिभिः सीदसादनम् ॥

भूः गणपतिं आवाहयामि ।
भुवः गणपतिं आवाहयामि ।
स्वः गणपतिं आवाहयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
ध्यायामि । ध्यानं समर्पयामि ।

ॐ महागणपतये नमः । आवाहनं समर्पयामि ।
ॐ महागणपतये नमः । आसनं समर्पयामि ।
ॐ महागणपतये नमः । पाद्यं समर्पयामि ।
ॐ महागणपतये नमः । अर्घ्यं समर्पयामि ।
ॐ महागणपतये नमः । आचमनीयं समर्पयामि ।
ॐ महागणपतये नमः । स्नानं समर्पयामि ।
ॐ महागणपतये नमः । वस्त्रं समर्पयामि ।
ॐ महागणपतये नमः । यज्ञोपवीतं समर्पयामि ।
ॐ महागणपतये नमः । चंदनं समर्पयामि ।
ॐ महागणपतये नमः । परिमल द्रव्यं समर्पयामि ।
ॐ महागणपतये नमः । पुष्पाणि समर्पयामि ।
ॐ महागणपतये नमः । धूपं समर्पयामि ।
ॐ महागणपतये नमः । दीपं समर्पयामि ।
ॐ महागणपतये नमः । नैवेद्यं समर्पयामि ।
ॐ महागणपतये नमः । ताम्बूलं समर्पयामि ।
ॐ महागणपतये नमः । फलं समर्पयामि ।
ॐ महागणपतये नमः । दक्षिणां समर्पयामि ।
ॐ महागणपतये नमः । आर्तिक्यं समर्पयामि ।

ॐ भूर्भुवस्वः महागणपतये नमः ।
मन्त्रपुष्पं समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
प्रदक्षिणा नमस्कारान् समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
छत्रं समर्पयामि ।

ॐ महागणपतये नमः । चामरं समर्पयामि ।
ॐ महागणपतये नमः । गीतं समर्पयामि ।
ॐ महागणपतये नमः । नृत्यं समर्पयामि ।
ॐ महागणपतये नमः । वाद्यं समर्पयामि ।
ॐ महागणपतये नमः । सर्व राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥
ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभा ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥
ॐ भूर्भुवस्वः महागणपतये नमः । प्रार्थनां समर्पयामि ।

अनया पूजया विघ्नहर्ता महागणपति प्रियताम् ॥

---

८ दीप स्थापना

अथ देव्यै वाम भागे दीप स्थापनं करिष्ये ।
अग्निनाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः ॥
(light the lamps)

---

९ भूमि प्रार्थना
(open palms and touch the ground)
महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां
पिप्रतान्नो भरीमभिः ॥

---

१० धान्य राशि

ॐ औषधाय संवदंते सोमेन सहराज्ञ ।
यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ॥
(Touch the grains/rice/wheat)

---

११ कलश स्थापना

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते
उक्तैर्यज्ञेषु वर्धते ॥
(keep kalasha on top of rice pile)
ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य ।
असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय ॥
(fill kalasha with water)
ॐ गंधद्वारां धुरादर्शां नित्य पुष्टां करीषिणीम् ।
ईश्वरीं सर्व भूतानां तामि होपह्वयेश्रियम् ॥
(sprinkle in/apply ga.ndha to kalasha)
ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।
बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः ॥

(put beetle nut in kalasha)
ॐ सहिरत्नानि दाशुषेसुवाति सविता भगः ।
तंभागं चित्रमीमहे ॥
(put jewels / washed coin in kalasha)
ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः ।
हिरण्ययात्परियोनेर्निषद्या हिरण्यदाददत्थ्यन्नमस्मै ॥
(put gold / dakShina in kalasha)
ॐ कान्डात् कान्डात् परोहंति परुषः परुषः परि एवानो दूर्वे
प्रतनु सहस्रेण शतेन च ॥
(put duurva / karika )
ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत ।
गो भाज इत्किला सथयत्स नवथ पूरुषम् ॥
(put five leaves in kalasha)
ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।
बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः ॥
(place coconut on top of kalasha)
ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः ।
तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः॥
(tie cloth for kalasha)
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ ।
वस्नेव विक्रीणावः इषमूर्जं शतकृतो ॥
(copper plate and aShTadala with ku.nkuM)

इति कलशं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१२ वरुण पूजन
On the second kalasha)

तत्वायामि शुनः शेपोः वरुण त्रिष्टुप् कलशे
वरुणावाहने विनियोगः ॥

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
आहेलमानो वरुणः बोध्युरुशं समान आयुः प्रमोषिः ॥

ॐ भूर्भुवःस्वः वरुणाय नमः । चंदनं समर्पयामि ॥
(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः । अक्षतान् समर्पयामि ॥
(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः । हरिद्रा कुंकुमं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः । धूपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः । दीपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः । नैवेद्यं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
सकल राजोपचारार्थे अक्षतान् समर्पयामि ॥

अवते हेळो वरुण नमोभिरिव यज्ञेभिरीमहे हविर्भिः ।
क्षयं नमस्मभ्यं सुरप्रचेता राजन्नेनाम्सि शिश्रथः कृतानि ॥
वरुणाय नमः । मन्त्र पुष्पं समर्पयामि ॥
प्रदक्षिणा नमस्कारान् समर्पयामि ॥

अनया पूजया भगवान् श्री महा वरुण प्रियताम् ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१३ कलश पूजन
(continue with second kalasha)

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥
कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः ।
ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥
अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः ।
अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ॥

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये ॥

ॐ सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतंति ।
ये वैतन्वं विस्रजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ति ॥
(Those who want to attain immortality take a
dip in the confluence of the Ganges, yamuna and
sarasvati rivers at the prayag. Let the water
in this kalasha become like the water from the
holy rivers)

॥ कलशः प्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥

(Let this kalasha increase our life span, presence
of mind, intellect,wealth, strength and status, destroy
our sins and increase our merits or puNya)

सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।
अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

(All the holy waters, and all the Gods are now
present in this kalasha. Our prostrations to this
puurNakumbha which is hence dear to Lord Hari)

कलशदेवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

॥ मुद्रा ॥

(Show mudras as you chant )

निर्वीषि करणार्थे तार्क्ष मुद्रा । (to remove poison)
अमृति करणार्थे धेनु मुद्रा । (to provide nectar - amrit)
पवित्री करणार्थे शङ्ख मुद्रा । (to make auspicious)
सम्रक्षणार्थे चक्र मुद्रा । (to protect)
विपुलमाया करणार्थे मेरु मुद्रा । (to remove mAyA)

---

१४ शङ्ख पूजन
(pour water from kalasha to sha Nkha
add ga.ndha flower)

शङ्खं चंद्रार्क दैवतं मध्ये वरुण देवताम् ।
पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीम् ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व देवैश्च पाञ्चजन्यं नमोऽस्तुते ॥
(This shaNkha has now become like the pAnchajanya, which has come out of the ocean and which is the hands of Lord MahaviShNu. Our prostrations to the pAnchajanya)

पाञ्चजन्याय विद्महे । पावमानाय धीमहि ।
तन्नो शङ्खः प्रचोदयात् ॥

शङ्ख देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि॥

---

१५ घंटार्चना
(Pour drops of water from sha Nkha on top of the bell apply ga.ndha flower)

आगमार्थन्तु देवानां गमनार्थन्तु राक्षसाम् ।
कुरु घंटारवं तत्र देवतावाह्न लांछनम् ॥
ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत् ।
राक्षसानां पिशाचानां तद्देशे वसतिर्भवेत् ।
तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत् ।

(When the bell is rung, knowingly or unknowingly, all the good spirits are summoned and all the evil spirits are driven away)

घंट देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(Ring the gha.nTA)

---

१६ आत्मशुद्धि

( Sprinkle water from sha Nkha on puja items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा ।
यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥

---

१७ षट् पात्र पूजा
( put tulasi leaves or axatAs in empty vessels)

वायव्ये अर्घ्यं ।
नैरृत्ये पाद्यं ।
ईशान्ये आचमनीयं ।
आग्नेये मधुपर्कं ।
पूर्वे स्नानियं ।
पश्चिमे पुनराचमनं ।

---

१८ पञ्चामृत पूजा
( put tulasi leaves or axataas in vessels )

क्षीरे सोमाय नमः । (keep milk in the centre)
दधिनि वायवे नमः । (curd facing east )
घृते रवये नमः । (Ghee to the south)
मधुनि सवित्रे नमः । ( Honey to west )
शर्करायां विश्वेभ्यो देवेभ्यो नमः । ( Sugar to north)

---

१९ द्वारपालक पूजा

पूर्वद्वारे द्वारश्रिये नमः । धात्रे नमः । विधात्रे नमः ।
दक्षिणद्वारे द्वारश्रिये नमः । चण्डाय नमः । प्रचण्डाय नमः ।
पश्चिमद्वारे द्वारश्रिये नमः । जयाय नमः । विजयाय नमः ।
उत्तरद्वारे द्वारश्रिये नमः । गङ्गायै नमः । यमुनायै नमः ।

मध्ये नव रत्नखचित दिव्य सिंहासनस्योपरि
श्री धन महा लक्ष्म्यै नमः ॥
द्वारपालक पूजां समर्पयामि ॥

---

२० पीठ पूजा

पीठस्य अधोभागे आधार शक्त्यै नमः ॥
आदिकूर्माय नमः ॥
अनन्ताय नमः ।
वराहाय नमः ॥
स्वर्णवेदिकायै नमः ॥
रत्नमंडपाय नमः ॥
सिंहासनाय नमः ॥
तन्मध्ये श्री धन महा लक्ष्म्यै नमः ।

पीठ पूजां समर्पयामि ॥

---

२१ प्राण प्रतिष्ठा
(hold flowers/axata in hand)
ध्यायेत् सत्यम् गुणातीतं गुणत्रय समन्वितं
लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ।
नीलवर्णं पीतवासं श्रीवत्स पदभूषितं
गोकुलानन्दं ब्रह्माध्यैरपि पूजितम् ॥

(hold flowers/axataa in hand)
ॐ अस्य श्री प्राण प्रतिष्ठा महामंत्रस्य
ब्रह्मा विष्णु महेश्वरा ऋषयः ।
ऋग्यजुस्सामाथर्वाणि छन्दांसि ।
सकलजगत्सृष्टिस्थिति संहारकारिणी प्राणशक्तिः परा देवता ।
आं बीजम् । ह्रीं शक्तिः । क्रोम् कीलकम् ।
अस्यां मूर्तौ प्राण प्रतिष्ठापने विनियोगः ॥

॥ करन्यासः ॥

आं अंगुष्ठाभ्यां नमः ॥
ह्रीं तर्जनीभ्यां नमः ॥
क्रोम् मध्यमाभ्यां नमः ॥
आं अनामिकाभ्यां नमः ॥
ह्रीं कनिष्ठिकाभ्यां नमः ॥
क्रोम् करतलकरपृष्ठाभ्यां नमः ॥

॥ अङ्गन्यासः ॥

आं हृदयाय नमः ॥
ह्रीं शिरसे स्वाहा ॥
क्रौं शिखायै वषट् ॥
आं कवचाय हुं ॥
ह्रीं नेत्रत्रयाय वौषट् ॥
क्रौं अस्त्राय फट् ॥

भूर्भुवस्वर्म् इति दिग्बन्धः ॥

॥ ध्यानम् ॥

रक्ताम्भोधिस्थ पोतोल्लस दरुण सरोजाधिरूढा कराब्जैः
पाशं कोदण्ड मिक्षुद्भव मळिगुण मप्यंकुशं पंचबाणान् ।
बिभ्राणासृक् कपालं त्रिनयन लसिता पीनवक्षोरुहाढ्या
देवी बालार्क वर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

लं पृथ्व्यात्मिकायै गन्धं समर्पयामि ।
हं आकाशात्मिकायै पुष्पैः पूजयामि ।
यं वाय्वात्मिकायै धूपमाघ्रापयामि ।
रं अग्न्यात्मिकायै दीपं दर्शयामि ।
वं अमृतात्मिकायै अमृत महानैवेद्यं निवेदयामि ।
सं सर्वात्मिकायै सर्वोपचारपूजां समर्पयामि ॥

आं, ह्रीं, क्रोम्, क्रोम्, ह्रीं, आं ।
य, र, ल, व, श, ष, स, ह,
ॐ अहं सः सोऽहं सोऽहं अहं सः ॥

अस्यां मूर्ते प्राणः तिष्ठंतुः । अस्यां मूर्ते जीवः तिष्ठन्तु ।
अस्यां मूर्ते सर्वेन्द्रियाणि मनस्त्वत् चक्षुः
श्रोत्र जिह्वा घ्राणैः वाक्काणि पादपायोपस्थानि
प्राण अपान व्यान उदान समान अत्रागत्य
सुखेन स्थिरं तिष्ठन्तु स्वाहा ।

असुनीते पुनरस्मासु चक्षुवः पुनः प्राणमिह्नीनो
देहिभोगं जोक्षश्येम सूर्यमुच्चरन्तु मनुमते
मृडयान स्वस्ति अमृतं वै प्राणः अमृतमापः
प्राणानेव यथा स्थानं उपह्वयेत् ॥

स्वामिन् सर्व जगन्माते यावत् पूजावसानकम् ।
तावत्वं प्रीतिभावेन बिम्बेऽस्मिन् (कलशेस्मिन् प्रतिमायां )
सन्निधिं कुरु ॥

प्राणां प्रतिश्ठापयामि ॥
(offer flowers)

---

२२ ध्यानं

ॐ (repeat 9 times)
( Close eyes and bring Goddess in your mind and chant )

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

पद्मासने पद्मकरे, सर्वलोकैक पूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥

(you can add more related shlokas)

ॐ धन महा लक्ष्म्यै नमः । ध्यानात् ध्यानं समर्पयामि ॥

---

२३ आवाहनं
( hold flowers in hand)

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

सर्व मङ्गल माङ्गल्यै, विष्णु वक्ष स्थितालये ।
आवाहयामि देवि त्वां, सुप्रीता वरदा भव ॥

श्री धन महा लक्ष्म्यै नमः । आवाहनं समर्पयामि ॥
(offer flowers to Goddess) ।

आवाहितो भव । स्थापितो भव । सन्निहितो भव ।
सन्निरुद्धो भव । अवकुण्ठितो भव । सुप्रीतो भव ।
सुप्रसन्नो भव । सुमुखो भव । वरदो भव ।
प्रसीद प्रसीद ॥
(show mudras to Goddess)

---

२४ आसनं

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥

सूर्यायुत निभः स्पूर्ते, स्पुरद्रत्न विभूषितं ।
मंदासनं इदं देवि, स्थीयतां सुर पूजिते ॥

ॐ धन महा लक्ष्म्यै नमः । आसनं समर्पयामि ॥
(offer flowers/axathaas)

---

२५ पाद्यं
(offer water)

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥

शुद्धोदकं पात्रस्थं गन्ध पुष्पादि मिश्रितम् ।
पाद्यं दास्यामिते देवि, गृहाण सुरपूजिते ॥

ॐ धन महा लक्ष्म्यै नमः । पादोयो पाद्यं समर्पयामि ॥

---

२६ अर्घ्यं
(offer water)

चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवी जुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

सुवासितजलं रम्यं सर्वतीर्थ समुद्भवम् ।
अर्घ्यं गृहाण देवि त्वां सर्व देव नमस्कृते ॥

ॐ धन महा लक्ष्म्यै नमः । अर्घ्यं समर्पयामि ॥

---

२७ आचमनीयं
(offer water or axathaa/ leave/flower)

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥

सुवर्ण कलशान्वितं, चन्दना गरु संयुतं ।
गृहाणाचमनं देवि, मयादत्तं शुभप्रदे ॥

ॐ धन महा लक्ष्म्यै नमः । आचमनीयं समर्पयामि ॥

---

२८ स्नानं

मन्दाकिन्याः समानीतैर् हेमांभोरुह वासितैः ।
स्नानं कुरुष्व देवेशि सलिलैश्च सुगन्धिभिः ॥

ॐ धन महा लक्ष्म्यै नमः । मलापकर्श स्नानं समर्पयामि ॥

---

२९ पञ्चामृत स्नानं
२९.१ पय स्नानं (milk bath)

ॐ आप्याय स्व स्वसमेतुते
विश्वतः सोमवृष्ण्यं भवावाजस्य सन्गाधे ॥

सुरभेस्तु समुत्पन्नं देवानां अपि दुर्लभम् ।
पयो ददामि देवेशि स्नानार्थं प्रतिगृह्यताम् ॥

ॐ धन महा लक्ष्म्यै नमः । पयः स्नानं समर्पयामि ॥
पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.२ दधि स्नानं (curd bath)

ॐ दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः ।
सुरभिनो मुखाकरत् प्राण आयुंषितारिषत् ॥

चन्द्र मन्डल सम्काशं सर्व देव प्रियं हि यत् ।
दधि ददामि देवेशि स्नानार्थं प्रतिगृह्यताम् ॥

ॐ धन महा लक्ष्म्यै नमः । दधि स्नानं समर्पयामि ॥
दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.३ घृत स्नानं (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम
अनुष्ठधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यं ॥

आज्यं सुरानां आहारं आज्यं यज्ञे प्रतिष्ठितम् ।
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यता ॥

ॐ धन महा लक्ष्म्यै नमः । घृत स्नानं समर्पयामि ॥
घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.४ मधु स्नानं (honey bath)

मधुवाता ऋतायथे मधुक्षरंति सिन्धवः माध्विनः संतोष्वधीः
मधुनक्त मुथोषसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पित
मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः ॥

सर्वौषाधि समुत्पन्नं पीयुष सदृशं मधु ।
स्नानर्तन्ते मया दत्तं गृहाण परमेश्वरी ॥

ॐ धन महा लक्ष्म्यै नमः । मधु स्नानं समर्पयामि ॥
मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.५ शर्करा स्नानं (sugar bath)

ॐ स्वादुः पवस्य दिव्याय जन्मने स्वादुदरिन्द्राय सुहवीतु नाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमा अदाभ्यः ॥

इक्षु दन्डात् समुत्पन्ना रस्यस्निग्ध तरा शुभा ।
शर्करेयं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ धन महा लक्ष्म्यै नमः । शर्करा स्नानं समर्पयामि ॥
शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.६ गंधोदक स्नानं (Sandlewood water bath)

ॐ गंधद्वारां दुराधर्शां नित्य पुष्टां करीषिर्णीं ।
ईश्वरीं सर्व भूतानां तामि होप व्हयेश्रियं ॥

हरि चंदन संभूतं हरि प्रीतेश्च गौरवात् ।
सुरभि प्रिय गोविन्द गंध स्नानाय गृह्यतां ॥

ॐ धन महा लक्ष्म्यै नमः । गंधोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.७ अभ्यंग स्नानं (Perfumed Oil bath)

ॐ कनिक्रदज्वनुशं प्रभ्रुवान इयर्थिर्वाचमरितेव नावं ।
सुमंगलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत ॥

अभ्यंगार्थं सुन्दरी देवि तैलं पुष्पादि संभवं ।
सुगंध द्रव्य संमिश्रं संगृहाण जगन् माते ॥

ॐ धन महा लक्ष्म्यै नमः । अभ्यंग स्नानं समर्पयामि ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.८ अंगोद्वर्तनकं (To clean the body)

अंगोद्वर्तनकं देवी कस्तूर्यादि विमिश्रितं ।
लेपनार्थं गृहाणेदं हरिद्रा कुंकुमैर्युतं ॥

ॐ धन महा लक्ष्म्यै नमः । अंगोद्वर्तनं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.९ उष्णोदक स्नानं (Hot water bath)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतं ।
स्नानार्थं च प्रयश्चमे स्वीकुरुश्व दयानिधे ॥

ॐ धन महा लक्ष्म्यै नमः । उष्णोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१० शुद्धोदक स्नानं (Pure water bath)
sprinkle water all around

ॐ आपोहिष्टा मयो भुवः । तान ऊर्जे दधातन ।
महेरणाय चक्षसे । योवः शिवतमोरसः तस्यभाजयते हनः ।
उशतीरिव मातरः । तस्मा अरंगमामवो ।
यस्य क्षयाय जिंवध । आपोजन यथा चनः ॥

ॐ धन महा लक्ष्म्यै नमः । शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥
(after sprinkling water around throw one tulasi leaf to the north)

---

३० महा अभिषेकः
(Sound the bell pour water from kalasha)

श्री सूक्त

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥

तां म आवह जातवेदो लक्ष्मीमनप गामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२ ॥

अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३ ॥

कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४ ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव जुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५ ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥६ ॥

उपैतुमां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥८ ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९ ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१० ॥

कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥१२ ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३ ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४ ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५ ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६ ॥

पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे ।
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥१७ ॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥१८ ॥

पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥१९ ॥

पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवेरथं ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥२० ॥

धनमग्निर् धनं वायुर्धनं सूर्यो धनं वसुः
धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ॥२१ ॥

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥२२ ॥

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥२३ ॥

ॐ धन महा लक्ष्म्यै नमः ।श्री सूक्त स्नानं समर्पयामि ॥

---

३१ प्रतिष्ठापना

ॐ धन महा लक्ष्म्यै नमः ॥
(Repeat 12 times)

ॐ तदस्तु मित्रा वरुणा तदग्ने सम्योरश्मभ्यमिदमेस्तुशस्तम् ।
अशीमहि गादमुत प्रतिष्ठां नमो दिवे ब्रहते साधनाय ॥
ॐ ग्रिहावै प्रतिष्ठासूक्तं तत् प्रतिष्ठित तमया वाचा ।
शं स्तव्यं तस्माद्यद्यपिदूर इव पशून् लभते गृहानेवै ॥
नानाजिगमिशति ग्रिहाहि पशूनां प्रतिष्ठा प्रतिष्ठा

ॐ धन महा लक्ष्म्यै नमः ॥सुप्रतिष्ठमस्तु ॥

---

३२ वस्त्र
(offer two pieces of cloth for the Goddess)

उपैतु मां देवी सखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥

मुरार् जीताङ्घ्रीयुगले, दुकूल वसन प्रिये ।
वस्त्रयुग्मं प्रदास्यामि, गृहाण हरिवल्लभे ॥

ॐ धन महा लक्ष्म्यै नमः ।वस्त्रयुग्मं समर्पयामि ॥

३३.१ कंचुकी

नवरत्नाभिर्दधां सौवर्णैश्चैव तंतुभिः ।
निर्मितां कंचुकीं भक्त्या गृहाण परमेश्वरी ॥
ॐ धन महा लक्ष्म्यै नमः ।कंचुकीं समर्पयामि ॥

३३.२ कण्ठ सूत्र

मांगल्य तंतुमणिभिः मुक्तैश्चैव विराजितं ।
सौमंगल्याभिवृध्यर्थं कंठसूत्रं ददामिते ॥
ॐ धन महा लक्ष्म्यै नमः ।कंठसूत्रं समर्पयामि ॥

३३.३ ताडपत्राणि

ताडपत्राणि दिव्याणि विचित्राणि शुभानि च ।
कराभरणयुक्तानि मातस्तत्प्रतिगृह्यतां ॥
ॐ धन महा लक्ष्म्यै नमः ।ताडपत्राणि समर्पयामि ॥

३३.४ हरिद्रा

हरिद्रा रंजिते देवी सुख सौभाग्य दायिनी ।
हरिद्रांते प्रदास्यामि गृहाण परमेश्वरि ॥
ॐ श्री धन महा लक्ष्म्यै नमः ।हरिद्रा समर्पयामि ॥

३३.५ कुंकुम

कुंकुमं कामदां दिव्यं कामिनी काम संभवं ।
कुंकुमार्चिते देवी सौभाग्यार्थं प्रतिगृह्यतां ॥
ॐ श्री महा लक्ष्म्यै नमः ।कुंकुमं समर्पयामि ॥

३३.६ कज्जल

सुनील भ्रमराभसं कज्जलं नेत्र मण्डनं ।
मयादत्तमिदं भक्त्या कज्जलं प्रतिगृह्यतां ॥
ॐ श्री धन महा लक्ष्म्यै नमः ।कज्जलं समर्पयामि ॥

३३.७ सिंदूर

विद्युत् कृशानु संकाशं जपा कुसुमसन्निभं ।
सिन्दूरंते प्रदास्यामि सौभाग्यं देहि मे चिरं ॥
ॐ श्री धन महा लक्ष्म्यै नमः ।सिन्दूरं समर्पयामि ॥

३३.८ नाना आभरणं

स्वभावा सुन्दराङ्गि त्वं नाना रत्न युतानि च ।
भूषणानि विचित्राणि प्रीत्यर्थं प्रतिगृह्यतां ॥
ॐ श्री धन महा लक्ष्म्यै नमः ।नाना आभरणानि समर्पयामि ॥

सुवर्णेन कृतं हारं, मौक्तिकैश्च सुशोभितं ।
भक्त्या समर्पितं तुभ्यं, भूषणं प्रतिगृह्यतां ॥
ॐ धन महा लक्ष्म्यै नमः ।सर्व आभरणानि समर्पयामि ॥

३३.९ नाना परिमल द्रव्य

नाना सुगन्धिकं द्रव्यं चूर्णीकृत्य प्रयत्नतः ।
ददामि ते नमस्तुभ्यं प्रीत्यर्थं प्रतिगृह्यतां ॥
ॐ श्री धन महा लक्ष्म्यै नमः ।नाना परिमल द्रव्यं समर्पयामि ॥

३४ उपवीत

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥

तप्तहेमकृतं सूत्रं, मुक्त धाम विभूषितां ।
उपवीतं इदं देवि, गृहाण त्व शुभ प्रदे ॥

ॐ धन महा लक्ष्म्यै नमः ।उपवीतं समर्पयामि ॥

३५ गंध

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

कर्पूरागरू कस्तूरी, रोचनादिभिरन्वितं ।
गंधं दास्याम्यहं देवि, प्रीत्यर्थं प्रतिगृह्यतां ॥

ॐ धन महा लक्ष्म्यै नमः ।गंधं समर्पयामि ॥

३६ नाना परिमल द्रव्य

ॐ अहिरैव भोघ्यैः पर्येति बाहुं जाया हेतिं परिभादमानः ।
हस्तग्नो विश्वा वायुनानि विद्वान् पुमास्प्र मानसं परिपातु विश्वतः ॥
ॐ धन महा लक्ष्म्यै नमः ।नाना परिमल द्रव्यं समर्पयामि ॥

३७ अक्षत

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

अक्षतान् धवलान् देवि, शालीयान् स्थण्डुलान् शुभान् ।
हरिद्रा कुंकुमोपेतौ, ग्रह्यतां अब्धिपुत्रिके ॥

ॐ धन महा लक्ष्म्यै नमः ।अक्षतान् समर्पयामि ॥

---

३८ पुष्प

कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

मल्लिका जाजी कुसुमै, चम्पकैर् वकुलै शुभै ।
शतपत्रैश्च कल्हारैः, पूजयामि हरिप्रियै ॥

माल्यदीनि सुगन्धीनि माल्यतादीनि वैप्रभो ।
मया हृतानि पूजार्थम्, पुष्पाणि प्रतिगृह्यताम् ॥

ॐ धन महा लक्ष्म्यै नमः ।पुष्पाणि समर्पयामि ॥

---

३९ नाना अलंकार

कटि सूताङ्गुली येच कुण्डले मुकुटं तथा ।
वनमालां कौस्तुभं च गृहाण सुलोचनि ॥

ॐ धन महा लक्ष्म्यै नमः ।नाना अलंकारान् समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।हस्त भूषणं समर्पयामि ॥

---

४० अथाङ्गपूजा
(for Goddess Lakshmi)

ॐ रमायै नमः ।पादौ पूजयामि ॥
ॐ क्षीराब्धितनयायै नमः ।गुल्फौ पूजयामि ॥
ॐ पद्मायै नमः ।जानुनी पूजयामि ॥
ॐ कमलायै नमः ।जङ्घे पूजयामि ॥
ॐ संपत्प्रदायिन्यै नमः ।ऊरून् पूजयामि ॥

ॐ विष्णुवल्लभायै नमः ।नाभिं पूजयामि ॥
ॐ कमलवासिन्यै नमः ।कुक्षिं पूजयामि ॥
ॐ सर्वदायिन्यै नमः ।उदरं पूजयामि ॥
ॐ हरिप्रियायै नमः ।हृदयं पूजयामि ॥
ॐ मङ्गलदेवतायै नमः ।वक्षस्थलं पूजयामि ॥

ॐ श्रियै नमः ।स्थानौ पूजयामि ॥
ॐ लोकमात्रे नमः ।बाहुं पूजयामि ॥
ॐ कमलाहस्तायै नमः ।हस्तान् पूजयामि ॥
ॐ वरप्रदायै नमः ।भुजान् पूजयामि ॥
ॐ कंभुकन्टिन्यै नमः ।कण्ठं पूजयामि ॥

ॐ श्रुतिस्तुतायै नमः ।श्रोत्रं पूजयामि ॥
ॐ लोकजनन्यै नमः ।नेत्राणि पूजयामि ॥
ॐ प्रसन्नवदनायै नमः ।वदनं पूजयामि ॥
ॐ इंदिरायै नमः ।ललाटं पूजयामि ॥
ॐ क्षीरसागर कन्यकायै नमः ।शिरः पूजयामि ॥

ॐ धन महालक्ष्म्यै नमः ।सर्वाङ्गाणि पूजयामि ॥

---

४१ अथ पुष्प पूजा

ॐ इंदिरायै नमः ।पूग पुष्पं समर्पयामि ॥
ॐ रमायै नमः ।जाजी पुष्पं समर्पयामि ॥
ॐ पद्मप्रियायै नमः ।चम्पक पुष्पं समर्पयामि ॥
ॐ हरिप्रिययै नमः ।वकुल पुष्पं समर्पयामि ॥
ॐ लोकमात्रे नमः ।मल्लिका पुष्पं समर्पयामि ॥
ॐ पद्मनिलयायै नमः ।पद्म पुष्पं समर्पयामि ॥
ॐ कमलवासिन्यै नमः ।सेवन्तिका पुष्पं समर्पयामि ॥
ॐ वरलक्ष्म्यै नमः ।निलोत्पल पुष्पं समर्पयामि ॥

ॐ सर्वैश्वर्य कारिण्यै नमः ।
नानाविध पुष्पाणि समर्पयामि ॥

---

४२ अथ पत्र पूजा

ॐ धनमहालक्ष्म्यै नमः ।माचि पत्रं समर्पयामि ॥
ॐ मायायै नमः ।मरुग पत्रं समर्पयामि ॥
ॐ क्षेमंकर्यै नमः ।सेवंतिका पत्रं समर्पयामि ॥
ॐ शुभ्ह प्रदायिन्यै नमः ।बिल्व पत्रं समर्पयामि ॥
ॐ त्रिपुरसुन्दर्यै नमः ।तुलसि पत्रं समर्पयामि ॥
ॐ विष्णुप्रियायै नमः ।विष्णुक्रांति पत्रं समर्पयामि ॥

ॐ धन महालक्ष्म्यै नमः ।पत्रपूजां समर्पयामि ॥

---

४३ ग्रन्थि पूजा

ॐ रमायै नमः ।प्रथम ग्रंथिं पूजयामि ॥
ॐ सर्वमङ्गलायै नमः ।द्वितीय ग्रंथिं पूजयामि ॥
ॐ कमलवासिन्यै नमः ।तृतीय ग्रंथिं पूजयामि ॥
ॐ मन्मथजनन्यै नमः ।चतुर्थ ग्रंथिं पूजयामि ॥
ॐ विष्णुवल्लभायै नमः ।पंचम ग्रंथिं पूजयामि ॥
ॐ क्षीराब्धि कन्यकायै नमः ।षष्ठ ग्रंथिं पूजयामि ॥
ॐ लोकमात्रे नमः ।सप्तम ग्रंथिं पूजयामि ॥
ॐ भार्गव्यै नमः ।अष्टम ग्रंथिं पूजयामि ॥
ॐ पद्महस्तायै नमः ।नवम ग्रंथिं पूजयामि ॥
ॐ पुष्ट्यै नमः ।दशम ग्रंथिं पूजयामि ॥

ॐ तुष्ट्यै नमः ।एकादश ग्रंथिं पूजयामि ॥
ॐ धनलक्ष्म्यै नमः ।द्वादश ग्रंथिं पूजयामि ॥

ॐ धन महालक्ष्म्यै नमः ।ग्रंथि पूजां समर्पयामि ॥

---

४४ लक्ष्मी नाम पूजा

ॐ महालक्ष्म्यै नमः ।
ॐ कमलायै नमः ।
ॐ पद्मासनयै नमः ।
ॐ सोमायै नमः ।
ॐ चन्डिकायै नमः ।
ॐ अनघायै नमः ।
ॐ रमायै नमः ।
ॐ पीताम्बरधारिण्यै नमः ।
ॐ दिव्यगन्धानुलेपनायै नमः ।
ॐ सुरूपायै नमः ।
ॐ रत्नदीप्तायै नमः ।
ॐ वाञ्चितार्थप्रदायिन्यै नमः ।
ॐ इंदिरायै नमः ।
ॐ नारायणायै नमः ।
ॐ कंबु ग्रीवायै नमः ।
ॐ हरिप्रियायै नमः ।
ॐ शुभदायै नमः ।
ॐ लोकमात्रे नमः ।
ॐ दैत्यदर्पापहारिण्यै नमः ।
ॐ सुरासुरपूजितायै नमः ।
ॐ धन महालक्ष्म्यै नमः ।
ॐ लक्ष्मी पूजां समर्पयामि ।

---

४५ अष्टोत्तरशतनाम पूजा
Chant Dhyaan Shlokas
लक्ष्मीं क्षीर समुद्र राजतनयां श्री रङ्ग धामेश्वरीं
दासी भूत समस्त देवि वनिता लोकैक दीपन्कुराम् ।
श्रीमन्मन्द कटाक्षलब्ध विभव ब्रह्मेन्द्र गङ्गाधरां
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्द प्रियाम् ॥

ॐ प्रकृत्यै नमः ।
ॐ विकृत्यै नमः ।
ॐ विद्यायै नमः ।
ॐ सर्वभूतहितप्रदायै नमः ।
ॐ श्रद्धायै नमः ।
ॐ विभूत्यै नमः ।
ॐ सुरभ्यै नमः ।
ॐ परमात्मिकायै नमः ।
ॐ वाचे नमः ।

ॐ पद्मालयायै नमः ।
ॐ पद्मायै नमः ।
ॐ शुचये नमः ।
ॐ स्वाहायै नमः ।
ॐ स्वधायै नमः ।
ॐ सुधायै नमः ।
ॐ धन्यायै नमः ।
ॐ हिरण्मय्यै नमः ।
ॐ लक्ष्म्यै नमः ।

ॐ नित्यपुष्टायै नमः ।
ॐ विभावर्यै नमः ।
ॐ अदित्यै नमः ।
ॐ दित्यै नमः ।
ॐ दीप्तायै नमः ।
ॐ वसुधायै नमः ।
ॐ वसुधारिण्यै नमः ।
ॐ कमलायै नमः ।
ॐ कान्तायै नमः ।

ॐ कामाक्ष्यै नमः ।
ॐ क्रोधसंभवायै नमः ।
ॐ अनुग्रहप्रदायै नमः ।
ॐ बुद्धये नमः ।
ॐ अनघायै नमः ।
ॐ हरिवल्लभायै नमः ।
ॐ अशोकायै नमः ।
ॐ अमृतायै नमः ।
ॐ दीप्तायै नमः ।

ॐ लोकशोकविनाशिन्यै नमः ।
ॐ धर्मनिलयायै नमः ।
ॐ करुणायै नमः ।
ॐ लोकमात्रे नमः ।
ॐ पद्मप्रियायै नमः ।
ॐ पद्महस्तायै नमः ।
ॐ पद्माक्ष्यै नमः ।
ॐ पद्मसुन्दर्यै नमः ।
ॐ पद्मोद्भवायै नमः ।

ॐ पद्ममुख्यै नमः ।
ॐ पद्मनाभप्रियायै नमः ।
ॐ रमायै नमः ।
ॐ पद्ममालाधरायै नमः ।
ॐ देव्यै नमः ।

ॐ पद्मिन्यै नमः ।
ॐ पद्मगन्धिन्यै नमः ।
ॐ पुण्यगन्धायै नमः ।
ॐ सुप्रसन्नायै नमः ।

ॐ प्रसादाभिमुख्यै नमः ।
ॐ प्रभायै नमः ।
ॐ चन्द्रवदनायै नमः ।
ॐ चन्द्रायै नमः ।
ॐ चन्द्रसहोदर्यै नमः ।
ॐ चतुर्भुजायै नमः ।
ॐ चन्द्ररूपायै नमः ।
ॐ इन्दिरायै नमः ।
ॐ इन्दुशीतलायै नमः ।

ॐ आह्लादजनन्यै नमः ।
ॐ पुष्टयै नमः ।
ॐ शिवायै नमः ।
ॐ शिवकर्यै नमः ।
ॐ सत्यै नमः ।
ॐ विमलायै नमः ।
ॐ विश्वजनन्यै नमः ।
ॐ तुष्ट्यै नमः ।
ॐ दारिद्र्यनाशिन्यै नमः ।

ॐ प्रीतिपुष्करिण्यै नमः ।
ॐ शान्तायै नमः ।
ॐ शुक्लमाल्यांबरायै नमः ।
ॐ श्रियै नमः ।
ॐ भास्कर्यै नमः ।
ॐ बिल्वनिलयायै नमः ।
ॐ वरारोहायै नमः ।
ॐ यशस्विन्यै नमः ।
ॐ वसुन्धरायै नमः ।

ॐ उदारांगायै नमः ।
ॐ हरिण्यै नमः ।
ॐ हेममालिन्यै नमः ।
ॐ धनधान्यकर्यै नमः ।
ॐ सिद्धये नमः ।
ॐ स्त्रैणसौम्यायै नमः ।
ॐ शुभप्रदाये नमः ।
ॐ नृपवेश्मगतानन्दायै नमः ।
ॐ वरलक्ष्म्यै नमः ।

ॐ वसुप्रदायै नमः ।
ॐ शुभायै नमः ।
ॐ हिरण्यप्राकारायै नमः ।
ॐ समुद्रतनयायै नमः ।
ॐ जयायै नमः ।
ॐ मंगळा देव्यै नमः ।
ॐ विष्णुवक्षस्थल स्थितायै नमः ।
ॐ विष्णुपत्न्यै नमः ।
ॐ प्रसन्नाक्ष्यै नमः ।

ॐ नारायणसमाश्रितायै नमः ।
ॐ दारिद्र्यध्वंसिन्यै नमः ।
ॐ देव्यै नमः ।
ॐ सर्वोपद्रव वारिण्यै नमः ।
ॐ नवदुर्गायै नमः ।
ॐ महाकाळ्यै नमः ।
ॐ ब्रह्माविष्णुशिवात्मिकायै नमः ।
ॐ त्रिकालज्ञानसंपन्नायै नमः ।
ॐ भुवनेश्वर्यै नमः ।

श्री धन महा लक्ष्मि देवतायै नमः ।
अष्टोत्तर पूजां समर्पयामि ॥

---

४६ धूपं

कर्दमेन प्रजाभूता मयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

दशाङ्गं गुग्गुलोपेतं, सुगन्धं च मनोहरं ।
धूपं दास्यामि देवेशि, महालक्ष्मि गृहाणतं ॥

ॐ धन महा लक्ष्म्यै नमः । धूपं आघ्रापयामि ॥

---

४७ दीपं

आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥

ग्रिथाक्रवर्थि संयुक्तं, अंधकाराव नाशितं ।
दीपं दास्यामिते देवि, गृहाण मुदिता भव ॥

साज्यं त्रिवर्ति संयुक्तं वह्निना योजितुम् मया ।
गृहाण मंगलं दीपं त्रैलोक्य तिमिरापहे ॥

ॐ धन महा लक्ष्म्यै नमः । दीपं दर्शयामि ॥

---

४८ नैवेद्यं

( dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'. remove lid and sprinkle water around the vessel; place in each food item one washed leaf or flower or akshata )

ॐ महा लक्ष्म्यै च विद्महे ।
विष्णुपत्नी च धीमही ।
तन्नो लक्ष्मी प्रचोदयात् ॥

ॐ धन महा लक्ष्म्यै नमः ॥

(show mudras)
निर्वीषिकरणार्थे तार्क्ष मुद्रा ।
अमृती करणार्थे धेनु मुद्रा ।
पवित्रीकरणार्थे शंख मुद्रा ।
संरक्षणार्थं चक्र मुद्रा ।
विपुलमाय करणार्थे मेरु मुद्रा ।

(Touch naivedya and chant 9 times) 'ॐ'
ॐ सत्यंतवर्तेन परिसिंचामि
(sprinkle water around the naivedya)
भोः! देवी भोजनार्थं आगश्चादि विज्ञाप्य ।
(request Goddess to come for dinner)

सौवर्णे स्थालिवैर्ये मणिगणखचिते गोघृतां
सुपक्कां भक्ष्यां भोज्यां च लेह्यानपि
सकलमहं जोष्यम्न नीधाय नाना शाकै रूपेतं
समधु दधि घृतं क्षीर पानीय युक्तं
तांबूलं चापि लक्ष्मि प्रतिदिवसमहं मनसे चिंतयामि ॥

अद्य तिष्ठति यत्किञ्चित् कल्पितश्चापरंग्रिहे
पक्कान्नं च पानीयं यथोपस्कर संयुतं
यथाकालं मनुष्यार्थे मोक्ष्यमानं शरीरिभिः
तत्सर्वं देविपूजास्तु प्रयतां मे जगदीश्वरी
सुधारसं सुविफुलं आपोषणमिदं
तव गृहाण कलशानीतं यथेष्टमुप भुज्ज्यताम् ॥

ॐ धन महा लक्ष्म्यै नमः नमः ।अमृतोपस्तरणमसि स्वाहा ।
(drop water from sha.nkha)

आर्द्रां यःकरिर्णीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

ॐ प्राणात्मने दुर्गायै स्वाहा ।
ॐ आपानात्मने चण्डिकायै स्वाहा ।
ॐ व्यानात्मने भारत्यै स्वाहा ।
ॐ उदानात्मने हरिप्रियायै स्वाहा ।
ॐ समानात्मने भुवनेश्वर्यै स्वाहा ।

नैवेद्यं गृह्यतां देवि भक्ति मे अचलां कुरु ।
ईप्सितं मे वरं देहि इहत्र च परां गतिं ॥

श्री लक्ष्मि नमस्तुभ्यम् महा नैवेद्यं उत्तमम् ।
सन्गृहाण परमेश्वरि भक्ति मुक्ति प्रदायकम् ॥

ॐ धन महा लक्ष्म्यै नमः ।नैवेद्यं समर्पयामि ॥

(cover face with cloth, and chant gaaya-tri ma.ntra five times or
repeat 12 times OM mahalaxmyai namaH )

सर्वत्र अमृतोपिधान्यमसि स्वाहा ॥
ॐ धन महा लक्ष्म्यै नमः ।उत्तरापोषणं समर्पयामि ॥
(Let flow water from sha.nkha)

---

४९ पाणीयं

घनसार सुगंधेन मिश्रितम् पुष्पवासितम् ।
पाणीयं गृह्यतां देवि शीतलं सुमनोहरं ॥

ॐ धन महा लक्ष्म्यै नमः ।पाणीयं समर्पयामि ॥

---

५० महा फलं
(put tulsi / axathaa on a big fruit)

इदं फलं मया देवी स्थापितं पुरतस्थव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ॥

ॐ धन महा लक्ष्म्यै नमः ।महाफलं समर्पयामि ।

---

५१ फलाष्टक
(put tulsi/akshata on fruits)

कूश्मान्ड मातुलिंगं च कर्कठी दादिमी फलम् ।
रम्भा फलं जम्बीरं बदरं तथा ॥

ॐ धन महा लक्ष्म्यै नमः ।फलाष्टकं समर्पयामि ॥

---

५२ करोद्वर्तन

कर्पूर मिश्रितं तोयं कस्तूर्यादि समंवितम् ।
गृहाण परमेश्वरी करोद्वर्तनकं शुभम् ॥

करोद्वर्तनकं देवी मया दत्तं हि भक्तिथः ।
चारु चंद्र प्रभां दिव्यं गृह्ण जगदीश्वरी ॥

ॐ धन महा लक्ष्म्यै नमः ।करोद्वर्तनार्थे चंदनं समर्पयामि ॥

---

५३ तांबूलं

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयं पुरुषानहम् ॥

एलालवंग कस्तूरी कर्पूरैः पुण्यवासिताम् ।
वीटिकां मुखवासार्थं अर्पयामि सुरेश्वरि ॥

पूगिफलं सतांबूलं नागवल्लि दलैर्युतम् ।
ताम्बूलं गृह्यतां देवी येल लवंग सम्युक्तम् ॥

ॐ धन महा लक्ष्म्यै नमः ।पूगिफल ताम्बूलं समर्पयामि ॥

---

५४ दक्षिणा

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः ।
अनन्त पुण्य फलद अतः शान्तिं प्रयच्छमे ॥

ॐ धन महा लक्ष्म्यै नमः ।सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

---

५५ महा नीराजन

श्रीयै जातः श्रिय अनिरियाय श्रियं वयो जनित्रभ्यो ददातु
श्रियं वसाना अमृतत्व मायन् भवंति सत्य समिधा वितध्यून्
श्रिय येवैनं तत् श्रिया मादधाति संतत मृचा वषट्कृत्यं
संतत्तम् संधीयते प्रजया पशुभिः ययेवं वेद ॥

ॐ धन महा लक्ष्म्यै नमः ।उत्तरनीराजनं समर्पयामि ।
ॐ धन महा लक्ष्म्यै नमः ।महानीराजनं दीपं समर्पयामि ॥

---

५६ कर्पूर दीप

अर्चत प्रार्चत प्रिय मे दासो अर्चत ।
अर्चन्तु पुत्र का वतपुरन्न धृष्ण वर्चत ॥

कर्पूरकं महाराज्ञी रंभोद्भूतं च दीपकम् ।
मङ्गलार्थं महीपाल सङ्गृहाण जगत्पते ॥

ॐ धन महा लक्ष्म्यै नमः ।कर्पूर दीपं समर्पयामि ॥

---

५७ आरती

ॐ जय जगदीश हरे
(you can add more aaratii songs as needed)

---

५८ पुष्पांजलि

मन्दार पारिजातादि पाटली केतकानि च ।
जाती चंपक पुष्पाणि गृहाणेमानि शोभने ॥

ॐ धन महा लक्ष्म्यै नमः ।पुष्पांजलि समर्पयामि ॥

---

५९ प्रदक्षिणा

आर्द्राम् यः करिणीम् यष्टिम् पिङ्गलाम् पद्ममालिनीम् ।
चन्द्राम् हिरण्मयीम् लक्ष्मीम् जातवेदो म आवह

यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्य भावेन रक्ष रक्ष जनार्धनी ॥

ॐ धन महा लक्ष्म्यै नमः ।प्रदक्षिणान् समर्पयामि ॥

---

६० नमस्कार

ताम् म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यम् प्रभूतम् गावोदास्योश्वान्विन्देयम् पुरुषानहं ॥

नमः सर्व हितार्थाय जगदाधार हेतवे ।
साष्टाङ्गोयं प्रणामस्ते प्रयत्नेन मया कृतः ।
ऊरूसा शिरसा दृष्ट्वा मनसा वाचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टाङ्गं उच्यते ॥

शात्येनापि नमस्कारान् कुर्वतः जगदीश्वरि ।
शत जन्मार्चितम् पापम्, तत्क्षणदेव नश्यति ॥

ॐ धन महा लक्ष्म्यै नमः ।नमस्कारान् समर्पयामि ॥

---

६१ राजोपचार

गृहाण परमेश्वरी सरत्ने छत्र चामरे ।
दर्पणं व्यञ्जनं चैव राजभोगाय यत्नथः ॥

ॐ धन महा लक्ष्म्यै नमः ।छत्रं समर्पयामि ॥

ॐ धन महा लक्ष्म्यै नमः ।चामरं समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।गीतं समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।नृत्यं समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।वाद्यं समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।दर्पणं समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।व्यज्ञनं समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।आन्दोलणं समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।राजोपचारान् समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।सर्वोपचारान् समर्पयामि ॥
ॐ धन महा लक्ष्म्यै नमः ।समस्त राजोपचारार्थे अक्षतान् समर्पयामि ॥

---

६२ मंत्र पुष्प

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥

विद्या बुद्धि धनेश्वर्य पुत्र पौत्रादि संपदः ।
पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम् ॥

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं
पारमेष्ठां राज्यं महाराज्यमाधिपत्यमयं समंत
पर्यायिस्यात् सार्व भौमः सार्वायुशः अंतादा
परार्धात् पृथिव्यै समुद्र पर्यन्ताय एकरालिति तदप्येश
श्लोकोभिगीतो मरूतः परिवेष्टारो मरुतस्या वसन्गृहे
आवीक्षितस्य कामप्रेर्विश्वेदेवा सभासद इति ॥

ॐ धन महा लक्ष्म्यै नमः ।मंत्रपुष्पं समर्पयामि ॥

---

६३ शङ्ख ब्रमण

(make three rounds of sha.nkha with water like aarati and pour down; chant OM 9 times and show mudras)

इमां आपशिवतम इमं सर्वस्य भेषजे ।
इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ॥

---

६४ तीर्थ प्राशन

ॐ श्रियः कान्ताय कल्याण निधये निधयेर्तिनाम् ।
श्री वेन्कट निवासाय श्रीनिवासाय मङ्गलम् ॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम् ।
येषां हृदयस्थो भगवान् मङ्गलायतनो हरिः ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दीवर श्यामो हृदयस्तो जनार्दनः ॥

अकाल मृत्यु हरणं सर्व व्याधि निवारणं ।
सर्व पाप उपशमनं लक्ष्मी पादोदकं शुभम् ॥

---

६५ उपयन दानं
ब्राह्मण सुहासिनि पूजा
(wash feet wipe offer gandha kumkum flowers, fruits and gitfs and make obeisances)

इष्ट काम्यार्थ प्रयुक्त सम्यग् आचरित
धन महा लक्ष्मी व्रत, सांपूर्ण फल वाप्यर्थिं,
धन महा लक्ष्मी स्वरूपिणे
सुवसिन्ये वायन दानं करिष्ये

धन महा लक्ष्मी स्वरूपिण्ये सुवासिन्ये आवाहन पूर्वक
आसन गंध अक्षत धूप् दीपादि सकलाराधनैस्वर्चितं।

महा लक्ष्मि प्रतिगृह्णातु, महालक्ष्मी वै ददाति च
महा लक्ष्मि तरकोभ्यां, महा लक्ष्म्यै नमः

बलाय श्रियै यशसेनद्याय,
ॐ धन महालक्ष्म्यै नमः,
वायनदानं प्रतिगृह्णातु
(प्रतिग्रह्णां विलाति प्रतिवचनं)

---

६६ विसर्जन पूजा

आराधितानां देवतानां पुनः पूजां करिष्ये ॥

॥ पुनः पूजा ॥

ॐ धन महा लक्ष्म्यै नमः ।

ध्यायामि। ध्यानं समर्पयामि ।
आवाहयामि ।
आसनं समर्पयामि ।
पाद्यं समर्पयामि ।
अर्घ्यं समर्पयामि ।
आचमनीयं समर्पयामि ।
पञ्चामृत स्नानं समर्पयामि ।
महा अभिषेकं समर्पयामि ।
वस्त्रयुग्मं समर्पयामि ।
यज्ञोपवीतं समर्पयामि ।
गन्धं समर्पयामि ।
नाना परिमल द्रव्यं समर्पयामि ।
हस्तभूषणं समर्पयामि ।

अक्षतान् समर्पयामि ।
पुष्पं समर्पयामि ।
नाना अलंकारं समर्पयामि ।
अंग पूजां समर्पयामि ।
पुष्प पूजां समर्पयामि ।
पत्र पूजां समर्पयामि ।
नाम पूजां समर्पयामि ।
अष्टोत्तर पूजां समर्पयामि ।
धूपं आघ्रापयामि
दीपं दर्शयामि
नैवेद्यं समर्पयामि ।
महाफलं समर्पयामि ।
फलाष्टकं समर्पयामि ।
करोद्वर्तनकं समर्पयामि ।
ताम्बूलं समर्पयामि ।
दक्षिणां समर्पयामि ।
महानीराजनं समर्पयामि ।
कर्पूरदीपं समर्पयामि ।
प्रदक्षिणां समर्पयामि ।
नमस्कारान् समर्पयामि ।
राजोपचारं समर्पयामि ।
मन्त्रपुष्पं समर्पयामि ।

पूजांते छत्रं समर्पयामि ।
चामरं समर्पयामि ।
नृत्यं समर्पयामि ।
गीतं समर्पयामि ।
वाद्यं समर्पयामि ।
आंदोलिकारोहणं समर्पयामि ।
अश्वारोहणं समर्पयामि ।
गजारोहणं समर्पयामि ।

ॐ धन महा लक्ष्म्यै नमः । समस्त राजोपचार देवोपचार
शक्त्युपचार भक्त्युपचार पूजां समर्पयामि ॥

---

६७ आत्म समर्पण

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिशु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तं अच्युतम् ॥

मध्ये मन्त्र तन्त्र स्वर वर्ण न्यूनातिरिक्त लोप दोष
प्रायश्चित्तार्थं देवि नामत्रय महामन्त्र जपं करिष्ये ॥

ॐ रमायै नमः । लक्ष्म्यै नमः । धन लक्ष्म्यै नमः ॥
ॐ रमायै नमः । लक्ष्म्यै नमः । धन लक्ष्म्यै नमः ॥
ॐ रमायै नमः । लक्ष्म्यै नमः । धन लक्ष्म्यै नमः ॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देवी परिपूर्णं तथास्तु मे ॥

आवाहनं न जानामि, न जानामि विसर्जनम् ।
पूजाविधिं न जानामि क्षमस्व परमेश्वरी ॥

अनेन मया कृतेन श्री धन महा लक्ष्मी
सुप्रीतो सुप्रसन्नो वरदो भवतु ।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

नमस्मरोमि ।

---

६८ प्रसाद गृहणं

ॐ धन मह लक्ष्मी प्रसादं शिरसा गृह्णामि ॥

---

६९ क्षमापनं

अपराध सहस्राणि क्रियन्ते अहर्निशं मया ।
तानि सर्वाणि मे देवी क्षमस्व परमेश्वरि ॥

यान्तु देव गण सर्वे पूजां आदाय पर्तिवीम् ।
इष्ट काम्यर्थं सिध्यर्थं पुनरागमनाय च ॥

(Shake the kalasha)

॥ श्री कृष्णार्पणमस्तु ॥

---

Puja Text by Sri S A Bhandarkar;
converted to suit ITRANS encoding

Please send corrections to sanskrit@cheerful.com
Last updated December 7, 1999